# Madhva Tantra Mukha Mardanam

# મધ્વતન્ત્રમુખમર્દનમ્

## Document Information

Text title : Madhva Tantra Mukha Mardanam by Appaya Dikshitar

File name : madhvatantramukhamardanam.itx

Category : misc, sahitya, appayya-dIkShita

Location : doc_z_misc_general

Author : Shri Appaya Dikshitar

Transliterated by : Rahul Maity

Proofread by : Rahul Maity

Latest update : July 7, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 7, 2023

*sanskritdocuments.org*

# મધ્વતન્ત્રમુખમર્દનમ્

## ઉપોદ્ઘાતપ્રકરણમ્

શિવં વિષ્ણું વા યદ્યભિદધતિ શાસ્ત્રસ્ય વિષયં
તદિષ્ટં ગ્રાહ્યં નઃ સગુણમપિ તદ્બ્રહ્મ ભજતામ્ ।
વિરોધો નાતીવ સ્ફુરતિ નહિ નિન્દા નયવિદાં
ન સૂત્રાણામર્થાન્તરમપિ ભવદ્વાર્યમુચિતમ્ ॥ ૧॥

તથાઽપ્યાનન્દતીર્થીયં મતમગ્રાહ્યમેવ નઃ ।
યત્ર વૈદિકમર્યાદા ભૂયસ્યાકુલતાં ગતા ॥ ૨॥

અતઃ પઞ્ચાધિકરણીં લક્ષીકૃત્યૈવ તન્મતે ।
દૂષ્યસ્થલાનિ સર્વત્ર સૂચ્યન્તે સુધિયાં મુદે ॥ ૩॥

ઇત્યુપોદ્ઘાતપ્રકરણમ્ ।

## જિજ્ઞાસાધિકરણપૂર્વપક્ષદૂષણપ્રકરણમ્

આત્મા બ્રહ્મેત્યધીતઃ શ્રુતિશિખરગણૈર્નિર્વિશેષશ્ચ સર્વૈઃ
કિં તત્ર સ્વપ્રકાશે ગુણલવરહિતે વસ્તુ શાસ્ત્રેણ ચિન્ત્યમ્ ।
ઇત્યાક્ષેપો ગુરૂણાં નતિચયવિષયે સ્વાપ્રણમ્યત્વવાદં
શ્રુત્યન્તાનાં નિરૂપ્યઃ સ યદિ જડમતે કેન શાસ્ત્રસ્ય ન સ્યાત્ ॥ ૪॥

પ્રામાણ્યં સિદ્ધમેવ હ્યકૃતકવચસાં ત્વન્મતે તર્કશાસ્ત્રે
શસ્ત્રસ્યાઙ્ગં યદસ્ય સ્મરસિ હરિકૃતં બ્રહ્મતર્કાભિધાનમ્ ।
તચ્ચેદ્ભજ્યેત નિત્યં સ્ફુરદગુણલવપ્રત્યયાગાત્મૈદમર્થ્યે
તન્નિર્વાહાય તેષાં સગુણવિષયતા પૂર્વપક્ષેઽપિ તે સ્યાત્ ॥ ૫॥

સાક્ષી જીવઃ સુખાદીન્યનિશમનુભવન્સર્વમાનાધિકસ્તે
તેષાં તર્કે ત્વદિષ્ટો બલવદબલતાસંવિભાગશ્ચ સિદ્ધઃ ।
તસ્યાત્યન્તાનુકૂલં શ્રવણમપિ તવ પ્રાગ્વિચારાદપેક્ષં

શ્રુત્યન્તાનાં કુતઃ સ્યાદગુણવિષયતાપૂર્વપક્ષસ્ય લાભઃ ॥ ૬॥

શ્રુત્યન્તાનામખણ્ડો વિષય ઇતિ ચ તે કેન બોદ્ધવ્યમેત
ન્યાયૈસ્તાદર્થ્યમેષાં ઘટયદતિદૃઢૈઃ શાસ્ત્રમેકં ન ચેત્સ્યાત્ ।
તચ્ચેદઙ્ગી ક્રિયતે પ્રતિહતવિભિદપ્રત્યગાત્મૈકનિષ્ઠં
કસ્યાનારમ્ભાસિદ્ધ્યૈ પ્રભવતિ ભવતઃ પૂર્વપક્ષપ્રયાસઃ ॥ ૭॥

સિદ્ધેઽસિદ્ધે ચ સિદ્ધાન્ત્યભિમતવિષયે દૂષણં ચેત્ક્રિયતે
ન્યાયાપેક્ષા ન તસ્યોન્મિષતિ નિજમતપ્રક્રિયાર્થાનુવાદે ।
સિદ્ધાન્ત્યસ્વીકૃતેઽર્થે યદિ તુ વિષયતાપાદનં પૂર્વપક્ષે
કર્તવ્યં તર્હ્યુપાયઃ કથમિવ સુધિયા તત્ર નાપેક્ષણીયઃ ॥ ૮॥

એકં વાક્યં વિચાર્ય યદિ ભવતિ નયો વાઽપિ સર્વત્ર તુલ્ય
સ્તત્કિઞ્ચિન્નાયકૢપ્ત્યાઽનાભિમતરચના યુજ્યતે પૂર્વપક્ષે ।
સર્વેષામેવ નાનાવિધનયનિકરાનેતાત્પર્યસીમ્નાં
વેદાન્તાનાં વિમર્શાદ્વિષયવિરચના ત્વેકમીહતે શાસ્ત્રમ્ ॥ ૯॥

તચ્છાસ્ત્રં ચોદિતોઽન્યત્કરણચરમતવત્કલ્પ્યતે પૂર્વસિદ્ધં
જીવં તસ્ય સ્વસિદ્ધં વિષયમુયતો હન્ત તેઽસ્યૈવ સોઽસ્તુ ।
તેનૈકાર્થ્યે વિરોધેઽપ્યપહૃતવિષયં શઙ્ક્યતે ચેદિહેદં
જીવાંસદિગ્ધતોક્તિઃ ઘટની પૂર્વપક્ષસ્ય તે સ્યાત્ ॥ ૧૦॥

કા ચાત્રાનુપપત્તિર્જીવસ્ય સ્વપ્રભસ્ય વિષયત્વે ।
આવિદ્યકમાવરણં જાનીષે ચાનુમન્યસે ચ ત્વમ્ ॥ ૧૧॥

પુંસ્ત્વાદિવત્ત્વિતિ નયે પુરુષસ્ય હિ ત્વ-
માનન્દમાવૃતમભિન્નમુપેત્ય નિત્યમ્ ।
તત્ત્વાવબોદકસમનન્તરમસ્મદુક્તં
મુક્તૌ તદાવરણભઞ્જનમન્વવાદીઃ ॥ ૧૨॥

અભેદે દૃઢે તત્પ્રકાશાપ્રકાશાવવિદ્યાભિધબ્રહ્મશક્ત્યોપપન્નૌ ।
વિશેષેઽપિ તે જીવચૈતન્યરૂપં વિરોદ્ધું ન શક્નોતિ તસ્ય પ્રકાશમ્ ॥ ૧૩॥

મુખ્યો ભેદઃ સન્નપિ બ્રહ્મદૃષ્ટિં નેષ્ટે રોદ્ધું તત્ર કો વા વિશેષઃ ।
તદૃષ્ટિસ્તે નિત્યસિદ્ધો હિ જીવસ્તસ્માદન્યન્નાસ્તિ તદ્ગોચરત્વમ્ ॥ ૧૪॥

ઇતિ તવ સવિશેષાનન્દતદ્બ્રહ્મવચ્ચ
સ્ફુરણયુતમખણ્ડાનન્દમપ્યાદ્રિયન્તેયન્તે ।

અનધિગતમવિદ્યાશક્તિભૂમ્નૈવ ધીરાઃ
 સ હિ સકલમનૂદ્ય પ્રશ્નતોઽપિ પ્રસિદ્ધઃ ॥ ૧૫॥

યદિ ત્વેવં સત્યપ્યગુણવિષયં નાનુમનુષે
 તદા શાસ્ત્રં કામં ભવતુ સગુણબ્રહ્મવિષયમ્ ।
શ્રુતીનાં કાસાઞ્ચિત્તદપિ કથયત્યેવ વિષયં
 મહાતાત્પર્યેણ પ્રગુણમગુણે ન સ્થિતિજુઆમ્ ॥ ૧૬॥

તસ્માત્તુચ્છં પ્રાચિ પક્ષે શાસ્ત્રાનારમ્ભવર્ણનમ્ ।
તથૈવ તત્સિદ્ધાન્તેઽપિ તદારમ્ભસમર્થનમ્ ॥ ૧૭॥

ઇતિ જિજ્ઞાસાધિકરણપૂર્વપક્ષદૂષણપ્રકરણમ્ ।

## જિજ્ઞાસાધિકરણસિદ્ધાન્તદૂષણપ્રકરણમ્

અદ્વૈતે યદ્યશેષશ્રુતિસશિખરગિરામેઐકમત્યં નિરાસ્યં
 તાસાં બ્રહ્મેતિશબ્દો ગુણગરિમનિમિત્તોઽપિ નેષ્ટે ગુણત્વાત્ ।
નિર્દોષાશેષદીવ્યદ્ગુણજુષિ કલયન્સર્વવેદૈકમત્યં
 તદ્બદ્ધત્વાદિવાચા ત્વમપિ ખલુ તથૈવાઽન્યપર્યં બ્રવીષિ ॥ ૧૮॥

નાઽઽશઙ્ક્યોત્પત્તિશિષ્ટસ્થિતિરિહ યત ઇત્યન્યસિદ્ધાનુવાદા
 ત્યક્તં ચોત્પત્તિવાક્યાવગતિમપિ પશોર્ભૂરિબાધાદ્ધવિષ્ટ્વમ્ ।
અસ્તિ શ્રુત્યન્તરાનુગ્રહ ઇતિ સુશકં તદ્ધવિષ્ટ્વેઽપિ વક્તું
 રૂપત્વાદીવ કુમ્ભે ગુણિનિ ગુણગતં નાપિ નામ્નો નિમિત્તમ્ ॥ ૧૯॥

યશ્ચેશે ગુણગરિમા ન જીવવર્ગે ભૂમાખ્યસ્ત્વદભિમતો વિરુદ્ધ એષઃ ।
યત્તસ્મિન્નપિ ઘટતે સદા સતોઽસ્ય સ્વાનન્દપ્રભૃતિવદાવૃતેરભાનમ્ ॥ ૨૦॥

અપિ ચ ભગવાનેકોઽનેકસ્તનુસ્તનુમાનપિ
 સ્વયમવયવા નાસ્ત્યૈશ્વર્યાદ્વિરોધ ઇતીદૃશમ્ ।
વિષયગુણસાઙ્કર્યં વર્યં તવાભ્યુપગચ્છતઃ
 કથમિતરવદ્ભેદઃ સિધ્યેદ્વિરુદ્ધગુણાન્વયાત્ ॥ ૨૧॥

વિશેષં વૈકુણ્ઠે યદિ વદસિ ભેદપ્રતિનિધિં
 તમેકાનેકત્વપ્રભૃતિગુણસંવાસઘટકમ્ ।
સજીવબ્રહ્મત્વવ્યતિકરવિરોધં ચ શમયત્
 સમં ખલ્વત્રાપિ શ્રુતિશિરસિ ભેદાપવદનમ્ ॥ ૨૨॥

વક્તવ્યં તે વિરુદ્ધં ઘટયતિ ભગવચ્છક્તિરેવેત્યવશ્યં
નો ચેત્કૃત્સ્નપ્રસક્તિર્નિરવયવવચઃક્ષોભણં વા કથં સ્યાત્ ।
એકોઽનેકઃ સ્થિતશ્ચેત્યણુરખિલજગદ્વ્યાપકશ્ચેતિ વા તે
તત્ર વ્યર્થો વિશેષઃ ક્વચન તવ તયા સર્વનિર્વાહસિદ્ધેઃ ॥ ૨૩॥

કિઞ્ચાયં ભેદસાધ્યં કમપિ ઘટયિતું કલ્પ્યતે ન ત્વયાઽર્થં
કિન્તુ વ્યાહારમાત્રં ક્વચન કથમિવ સ્યાદ્વિરુદ્ધાર્થયોગઃ ।
સમ્બન્ધઃ સ્યાદ્ગુણાનાં ગુણિભિરિતરથા ગોચરસ્તત્પ્રતીતે-
ર્ન સ્યાદ્ભેદઃ પટાદિષ્વપિ ચ ઘટયતા સત્સુ તન્તુષ્વસત્ત્વમ્ ॥ ૨૪॥

ઐશ્વર્યાજ્જીવભાવં કથમિવ સ ભજેદ્દુઃખભીત્યાદિદુષ્યં
મેએવં દુઃખાદયસ્તે કરણગુણતયા ન સ્પૃશ્યન્ત્યેવ જીવમ્ ।
સ્વામિત્વે ન સ્પૃશન્તીત્યપિ ન તવ મતે તત્પરસ્યૈવ હીષ્ટં
તસ્માત્તસ્યાખિલાન્તઃ કરણગણપતેર્જીવતૈવાર્થનીયા ॥ ૨૫॥

દુઃખિત્વાદ્યેવ હેયં ન યદિ કથય તત્કિં ન બન્ધેષુ હેયં
નીચત્વં તત્પ્રયુક્તં યદિ તદિદમિતિ વ્યાકુરુષ્વ સ્ફુટોક્ત્યા ।
યચ્ચાક્રન્દાદિ દુઃખાદ્યુતિતનયહતં નાપિ સાર્વત્રિકં ત-
દ્યત્કિઞ્ચિત્તસ્ય કાર્યં યદિ તદિહ જગદ્વ્યાપૃતે નિત્યસિદ્ધમ્ ॥ ૨૬॥

એવં સુખિત્વકૃતમેવ હિ નર્તનાદિ
ગ્રાહ્યં ફલં તવ ભવેન્ન સુખિત્વમેવ ।
અસ્ત્વિત્યુશન્તમનુભૂતિમુપક્ષિપન્ત
લોકાઃ વિશાચ ઇતિ નિશ્ચિનુયુર્ભવન્તમ્ ॥ ૨૭॥

વિષ્ણૌ વિશ્વાતિશાયિન્યન્વાધિગુણકે જીવવર્ગાદ્વિભિન્ન
સર્વશ્રુત્યૈકમત્યં સમરસબલવલ્લિઙ્ગસઙ્ગત્યુપેયમ્ ।
અદ્વૈતે ચ શ્રુતીનામધિકવિરસતામત્ર સંસાધ્ય કુર્યાઃ
સિદ્ધાન્તં ચેત્કિઞ્ચિતફલમુપરિ તયોઃ સાધકત્વે નયૌઘઃ ॥ ૨૮॥

અગ્રે વાચ્યોઽપિ કસ્તે કથય નય ઇહ સ્થાપકો ભિન્નતાયા
જીવેશિત્રોર્ગુણાનાં સ ખલુ વિષમતા સા તુ દત્તોત્તરૈવ ।
નિર્ભેદત્વં તવેષ્ટં વિષમગુણજુષાં શક્રપાર્થાદિકાના
મન્યત્વસ્યોક્તિરન્યોન્તર ઇતિ બહુશઃ સમ્મતા ભેદહીને ॥ ૨૯॥

પ્રાબલ્યં ભવતોઽપ્યભેદવચસાં ભેદશ્રુતિભ્યો મતં
નો ચેદન્નમયાદયો વદ કથં ભિન્ના ભવેયુર્ન તે ।

ભેદે સત્યપિ યુજ્યતે હિ ભગવચ્છક્ત્યૈવ નિર્દોષતા
શક્તઃ કિં ન સ એક એવ બહુધા ભિન્નો હરિઃ ક્રીડિતુમ્ ॥ ૩૦॥

શબ્દાન્તરાદિકથનં ત્વિહ ભેદસિદ્ધ્યૈ
હાસાસ્પદં સદસિ દર્ભપવિત્રનીત્યા ।
પૂર્વત્ર તન્ત્ર ઇવ કાલ્પનિકેઽપિ ભેદે
તેષાં ઘટેત કિમિહાપિ ન ચારિતાર્થ્યમ્ ॥ ૩૧॥

નિર્મયાદપ્રવૃત્તે તવ તુ હતમતે સોઽપિ ભેદો ન સિધ્યે-
દ્યસ્ત્વં નાનાધિકારશ્રુતપરગુણસાઙ્કર્યમિચ્છસ્યુપાસ્તૌ ।
અંશાનાં ખલ્વભેદેઽપ્યથ ચ ભગવતા સન્તિ શબ્દાન્તરાદ્યા-
સ્તતસ્યાન્મત્સ્યાદિરીત્યા સકલજનિમતાં વાસુદેવાંશભાવઃ ॥ ૩૨॥

ઇત્થં જીવબ્રહ્મભેદે નિરસ્તે
શાસ્ત્રારમ્ભસ્થાપનાર્થં ત્વદિષ્ટે ।
જીવાભેદેઽપ્યાવૃત્તત્વાદ્વિચાર્યં
બ્રહ્મત્યસ્મદ્રીતિરેવાઽઽશ્રયસ્તે ॥ ૩૩॥

(ઇતિ પ્રથમાધિકરણદૂષણમ્ ।)
અપ્પદીક્ષિતસુધીવિનિર્મિતે મધ્વદર્શનમુખાપમર્દને ।
આદિમાધિકરણસ્ય દૂષણં ભૂષણં ભવતુ ધીમતામિદમ્ ॥ ૩૪॥

ઇતિ જિજ્ઞાસાધિકરણસિદ્ધાન્તદૂષણપ્રકરણમ્ ।

## જન્માદ્યધિકરણદૂષપ્રકરણમ્

તદ્બ્રહ્મેત્યસ્ય રૂઢ્યા તનુધરપરતામુજ્ઝતોઽનૂક્ત્યયોગા-
ત્કિં ત્વન્નાદ્યેષુ યુક્તા ભવતિ તવ મતે સા યતો વેત્યનૂક્તિઃ ।
બ્રહ્મૈક્યાત્તે, યુક્તા યદિ કિમિતિ તદા જીવવર્ગે ન યુક્તા
જીવાન્ભેદેઽપ્યાભિન્નાનપિ કથયસિ ભો બ્રહ્મણા તદ્ગુણેન ॥ ૩૫॥

યતો વેત્યાદ્યુક્તિઃ કથમિવ હિ જીવે ન ઘટતે
કથં તદ્બ્રહ્મેતિશ્રુતિરપસરેદ્રૂઢિવિષયાત્ ।
જગત્સ્રષ્ટું સર્વં પ્રભવતિ ખલુ ધ્યાનવિષયઃ
સમસ્તેઽયં માનોરથિક ઇતિ જીવસ્તવ મતે ॥ ૩૬॥

સ્થૂલપ્રપઞ્ચો યદિ ચાનુવાદ્યઃ સોઽપ્યસ્તિ તે ધ્યાનમનોરથાર્થઃ ।

સન્ત્યેવ તત્રાપ્યતિદુર્ઘટિતાનિ સર્વાપરોક્ષાદિષુ કો વિરોધઃ ॥ ૩૭॥

યદ્યેવં રોચયેથાઃ કથમિપિ ન ગતિં સ્વેષસંસિદ્ધબુદ્ધ્યા
    લબ્ધું તે વૃદ્ધિમૃદ્ધાં ધ્રુવમભિલષો મૂલમેવ પ્રણશ્યેત્ ।
અત્યન્તાભેદ એવ પરતરનુધરયોરાપતેત્તદ્વિરોધે
    રાજન્યોક્થ્યાદિરીત્યા બત વિપરિણમેદ્બાધ્યતેઽત્રાનુવાદ્યમ્ ॥ ૩૮॥

ઉક્થ્યાગ્નિષ્ટોમસંસ્થાપરિકરવિધયો વિપ્રજાતાવિવૈતે
    સર્વસ્રષ્ટૃત્વવાદાઃ પરપરપઠિતાઃ સન્તુ કસ્મિન્હતાઃ ।
અત્રૈવાઽઽરોપબાધદ્વિતયમનુભવન્ત્વદ્વિતીયત્વસિદ્ધ્યૈ
    ચિત્યગ્નિહોત્રે વિધય ઇવ પયઃશસ્તયે જર્તિલાદેઃ ॥ ૩૯॥

તદ્બ્રહ્મેત્યેક એવ પ્રભવતિ નિખિલસ્રષ્ટૃતાવાદવૃન્દં
    વિષ્ણોર્નાનાશ્રુતસ્થં વિધિરપવદિતું ત્વન્મતે પૂર્વરીત્યા ।
સર્વાદ્વૈતશ્રુતિભ્યો યદિ હિ સ બલવાન્યૌગિકો બ્રહ્મશબ્દઃ
    સર્વદ્વૈતશ્રુતિભ્યઃ કથમિવ ન ભવેત્તત્ર રૂઢિં પ્રપન્નઃ ॥ ૪૦॥

કિઞ્ચ શ્રુત્યેકગમ્ય રવ ઇવ રસનં સાધનં બાધનં વા
    કર્તું શક્તં ન માનાન્તરમખિલજગત્કર્તરીતિ સ્વરીતિઃ ।
સ્મૃત્યારૂઢાં કથં ન વ્યપગમયતિ તે લોકદૃષ્ટ્યા નિરૂઢા-
    મેકત્વાયોગશઙ્કાં પરતનુધરયોર્વલ્ગનં તન્મુધૈવ ॥ ૪૧॥

(ઇતિ દ્વિતીયાધિકરણદૂષણમ્ ।)
ઇત્યપ્પદીક્ષિતકૃતૌ મધ્વમતારમ્ભમર્દનગ્રન્થે ।
દ્વૈતીયીકાધિકરણદૂષણમસ્તુ ત્રયીવિદાં પ્રીત્યૈ ॥ ૪૨॥

ઇતિ જન્માદ્યધિકરણદૂષપ્રકરણમ્ ।

## શાસ્ત્રયોનિત્વાધિકરણદૂષણપ્રકરણમ્

કથં નિરસ્યા કથય ત્વયાઽનુમા પ્રસાધયન્તીદમનેકકર્તૃકમ્ ।
તથૈવ તાતપર્યમપિ શ્રુતેર્હિ સા નયે તદેકાર્થનિયત્યભાવતઃ ॥ ૪૩॥

કર્મબ્રહ્મોભયાર્થં ખલુ સકલમપિ વ્યાકરોઃ કર્મકાણ્ડં
    બ્રહ્મસ્વાર્થોભયાર્થાનુપનિષદુદિતાનપ્યતદ્વાચિશબ્દાન્ ।
અન્યાંશ્ચોમાદિવાગાદ્યુભયવિધપરાન્વાઙ્મનઃપ્રાણમુખ્યા-
    ન્કેન સ્યાદ્વાક્યમર્થત્રયમપરિમિતાર્તં ચ વહ્ન્યાદિસૂક્તમ્ ॥ ૪૪॥

શ્રેષપ્રાયે કવિત્વે પ્રમિતપરતયા શ્લાઘનીયે ચ સૂત્રે ।
નાનાકર્મોપયોગશ્રુતિસમધિગતાનેકબોધ્યે ચ મન્ત્રે ।
એકાર્થત્વવ્યવસ્થાત્યજનમનુમતં સર્વમીમાંસકાના-
મન્ત્રાપીચ્છયા તદ્યદિ ભવતિ તવ બ્રહ્મવાક્યેષ્વપિ સ્યાત્ ॥ ૪૫॥

સૃષ્ટ્યાદિશ્રવણૈર્વિશેષવચનાન્નારાયણૈકાન્તિભિઃ
સ્પૃશ્યા નેતરદેવતા ઇતિ વચસ્ત્વેકાર્થવાદોચિતમ્ ।
તસ્માત્તપરતા ભવત્તેવ પરં નાન્યાર્થધીવારણં
સ્રષ્ટૄણાં ચ વિમુક્તવત્તવ મતે નાઽઽશઙ્ક્યમીર્ષ્યાદિકમ્ ॥ ૪૬॥

સ્રષ્ટું પ્રત્યેકમીશાઃ સકલમપિ પરબ્રહ્મભૂતાસ્રયશ્ચે-
ત્સમ્ભૂયૈતે મૃજેયુઃ કિમિતિ ભજતિ તે નાત્ર શઙ્ગાવકાશમ્ ।
સ્રષ્ટું શક્તો વિનૈવ સ્વયમુપકરણૈરચ્યુતસ્તદ્વ્યપેક્ષા
સૃષ્ટૌ લીલાઽસ્ય દણ્ડગ્રહણમિવ ગતૌ જાઙ્ઘિકસ્યેતિગન્તુઃ ॥ ૪૭॥

કર્ત્રૈકત્વં વદન્તી કલયતુ ફણિતિર્વારણેરનાર્થવત્તા
એકૈકસ્યૈવ કર્તુબહુભવનમુખાનીતભેદપ્રસક્તેઃ ।
યેન ત્વં નેહ નાનાપ્રભૃતિમુપનિષદ્ભારતીં વિપ્રલબ્ધું
નિર્દ્વૈતબ્રહ્મચૌર્યવ્યસનમનુભવન્નીહસે સાહસેન ॥ ૪૮॥

યો યસ્યોપાસ્તિયોગ્યઃ સ્ફુરતિ નિયમતસ્તસ્ય કર્તા સ એવે-
ત્યર્થં તં તાવદૈક્યશ્રુતરનુવદતુ શ્રોત-ધીભેદભિન્નમ્ ।
કૂર્મો યસ્યાલ્પભૂયો નકિલગુણપરોપાસ્તિયોગ્યત્વભાજા-
માત્મેત્યેવેત્યુપાસાવિધિરવધૃતિમાનિત્થમર્થં બ્રુવાણઃ ॥ ૪૯॥

પૂર્ણત્વં તે નિમિત્તં નિરવધિગણનં ભૂમશબ્દસ્ય વૃત્તૌ
વૈકુણ્ઠે તદ્ગુણાનાં તદપિ કિલ તતસ્તારતમ્યેન વેદ્યમ્ ।
ઇત્થં વસ્તુસ્વભાવં ક્વચિદવિગણયન્બોધ્યધીવૃત્તિભેદા-
દ્ભેદઃ સ્યાદસ્તિવાદી યદિ તવ ભવતિ વ્યાસકઃ કાઽત્ર ચિન્તા ॥ ૫૦॥

કિઞ્ચ સ્થાણુવિરિઞ્ચયોરપિ જગત્કૃર્તૃત્વમાવેદય-
ન્નાસ્ત્યેવ શ્રુતિમસ્તકેષુ બહુધા વૈશિષિકો ગીર્ગણઃ ।
ઐકાર્થ્યં સહતે સ સૃષ્ટિવચસાં નૈવ ત્વદીયે મતે
તત્તન્નામપદપ્રસિદ્ધ્યતિગતૌ હેતુશ્ચ નાસ્ત્યેવ તે ॥ ૫૧॥

(ઇતિ તૃતીયાધિકરણદૂષણમ્ ।)

ઇત્યપ્પદીક્ષિતકૃતૌ કૃતિના મતેઽસ્મિ-

ન્નાનન્દતીર્થકૃતશાસ્ત્રમુખાપમર્દે ।
એતત્તૃતીયમધિકૃત્ય નયં પ્રવૃત્તં
દોષપ્રદર્શનમુપસ્કરણીયમાર્યૈઃ ॥ ૫૨॥

ઇતિ શાસ્ત્રયોનિત્વાધિકરણદૂષણપ્રકરણમ્ ।

## સમન્વયાધિકરણદૂષણપ્રકરણમ્

રોદ્ધા નોપક્રમાદિઃ શ્રુતિષુ નયગણસ્ત્વન્મતેઽર્થાન્તારાણાં
રોદ્ધા ચેત્કર્મકાણ્ડે કથમપિ ન ભવેદ્બ્રહ્મનિષ્ઠા પદાનામ્ ।
કિઞ્ચાત્રોપકર્માદાવપિ તવ વિસરેદ્ભૂમશબ્દસ્ય રીતિ-
સ્તસ્માત્સર્વસ્તમેવ શ્રયતિ નયગણં સ્વસ્વસિદ્ધાન્તસિદ્ધ્યૈ ॥ ૫૩॥

સ્ફારાત્તત્તત્પુરાણાગમવચનશતપ્રાપિતા યાઽન્યનિન્દા
તત્તદ્ભક્ત્યાદિસિદ્ધ્યૈ સ્તવનવિરચને સા ભવદ્દ્વારમાત્રમ્ ।
કર્માનુષ્ઠાપનાર્થં કિમિ નિરતિશયાં બ્રહ્મસંસ્તાદિનિન્દા-
માપસ્તમ્બાદિવાક્યે ન કલયસિ તતઃ કાઽસ્ય હાનિસ્તવેષ્ટા ॥ ૫૪॥

(ઇતિ ચતુર્થાધિકરણદૂષણમ્ ।)
ઇત્યપ્પદીક્ષિતકૃતૌ મધ્વતન્ત્રવિમર્દને ।
દૃષ્ટ્વા સન્તોઽનુગૃહ્ણન્તુ ચતુર્થનયદૂષણમ્ ॥ ૫૫॥

ઇતિ સમન્વયાધિકરણદૂષણપ્રકરણમ્ ।

## ઈક્ષ્યત્યધિકરણદૂષણપ્રકરણમ્

ન ધ્યેયં બ્રહ્મ નેદં યદિદમિતિ ગિરિ હ્યભ્યુપેતં ત્વયાઽતો
ધ્યેયાર્થાનાં શ્રુતીનાં ક્વચિદપિ ન ચ તદ્વાચ્યમિત્યભ્યુપેયમ્ ।
નો ચેન્ન ધ્યેયમેતત્કથમિતિ ભવતિ સ્યાદવાર્યૈવ શઙ્કા
યદ્વાચેતિ શ્રુતિશ્ચ ક્ષિપતિ તદસનાયૈવ વાચ્યત્વમસ્ય ॥ ૫૬॥

ધ્યેયાર્થા એવ વાચ્યાસ્તવ નિગમગિરઃ સ્રષ્ટૃતાદીન્વદન્ત્ય-
સ્ત્વં હિ ધ્યાનૈકનિષ્ઠાં ગુણગણફણિતિં બ્રહ્મણો વક્ષ્યશેષામ્ ।
તત્તાસાં બ્રહ્મણઃ સ્યાત્પ્રતિફલનભિદા કાઽપિ વાચ્યા મતે તે
યદ્વાચેત્યેવમાદ્યૈઃ કતિપયવચનૈર્બ્રહ્મ શુદ્ધં ચ લક્ષ્યમ્ ॥ ૫૭॥

(ઇતિ પઞ્ચમાધિકરણદૂષણમ્ ।)

મધ્વશાસ્ત્રમુખમર્દને મનાગપ્યદીક્ષિતકૃતાવિદં બુધાઃ ।
પશ્યત પ્રણયવશ્યચેતસઃ પઞ્ચમાધિકરણસ્ય દૂષણમ્ ॥ ૫૮॥

ઇતીક્ષ્યત્યધિકરણદૂષણપ્રકરણમ્ ।

## ઉપસંહારપ્રકરણમ્

ઇત્થં ત્વત્ક્લૃપ્ત્યૈવ પ્રતિહતિમયતિ ન્યાયમર્યાદયા તે
શાસ્ત્રસ્યાસ્યાન્તરઙ્ગે મુખનયનિકરે દૂષણીયં કિમગ્ર ।
તેનૈવાગ્રે નયા હિ સ્ફુટમતિશિથિલાસ્તે યદિ સ્યુઃ સમર્થા-
સ્ત્વદૃષ્ટૈર્વેદવાક્યૈર્જહિહિ જડ તદા ન્યાયચિન્તાં દુરન્તામ્ ॥ ૫૯॥

ઇત્યપ્પદીક્ષિતેનેદં મધ્વોપક્રમમક્રમમ્ ।
તદ્રીત્યૈવ મતં ધ્વસ્તં સઙ્ક્ષેપેણ સમન્તતઃ ॥ ૬૦॥

તસ્માદ્યત્તેઽનુપાસ્યં વિમલસુખતનુ બ્રહ્મ કૂટસ્તમિષ્ટં
શાસ્ત્રેઽપ્યસ્મિન્વિચાર્યં ગમિતમુપનિષલ્લક્ષ્યતાં મુક્તભોગ્યમ્ ।
સોઽસાવાનન્દ એવેત્યુચિતમસુમતામાવૃતો યસ્ત્વયોક્ત
સ્તદ્ભેદે નાસ્તિ માનં કિમપિ નિગમતો લાઘવેનૈક્યસિદ્ધેઃ ॥ ૬૧॥

મધ્વાદિભિર્મુષિતમત્ર સદદ્વિતીયં
પ્રત્યાહરન્તદિદમાગમમૌલિરત્નમ્ ।
આચ્છાદ્ય ગોપિતમસારતરૈસ્તદર્થૈ-
સ્તત્ક્ષુલ્લકાધિકરણસ્થલમર્દનેન ॥ ૬૨॥

આદ્રિયધ્વમિદમધ્વદર્શનં
વ્યધ્વનં ત્યજત મધ્વદર્શનમ્ ।
શાઙ્કરં ભજત શાશ્વતં મતં
સાધવઃ સ ઇહ સાક્ષ્યુમાધવ ॥ ૬૩॥

આસુરાન્વિજિગીષોઃ સ્વયમદ્વૈતબ્રહ્મરત્નહરાન્ ।
વિબુધેન્દ્રસ્ય સખાયો મરુત ઇવ સન્ત્વિમે મુખ્યાઃ ॥ ૬૪॥

વિદ્વદ્ગુરોર્વિહિતવિશ્વજિદધ્વરસ્ય
શ્રીસર્વતોમુખમહાવ્રતયાજિસૂનોઃ ।
શ્રીરઙ્ગરાજમખિનઃ શ્રિતચન્દ્રમૌલિ-
રસ્ત્યપ્પદીક્ષિત ઇતિ પ્રથિતસ્તનૂજઃ ॥ ૬૫॥

સોઽયં મિતપદમકરોન્મિહાતાર્થં મધ્વશાસ્ત્રમુખભઙ્ગમ્ ।
પ્રીત્યૈ પુરામરાતેઃ શ્રીકામાક્ષીસમેતસ્ય ॥ ૬૬॥

ઇત્યુપસંહારપ્રકરણં સમાપ્તમ્ ॥

ઇતિ શ્રીમદપ્પય્યદીક્ષિતવિરચિતં મધ્વતન્ત્રમુખમર્દનં સમ્પૂર્ણમ્ ।

Encoded and proofread by Rahul Maity

*Madhva Tantra Mukha Mardanam*
pdf was typeset on July 7, 2023

Please send corrections to *sanskrit@cheerful.com*